ललाटदेशे। भ्रू घ्राणमध्ये प्रियसङ्गमः स्यात् नासाक्षि-
मध्ये च सहायलाभः। दृगन्तमध्यस्फुरणेऽर्थलाभोत्कण्ठे
क्रमाद्दिस्फुरिते दृगादौ। जयो दृशाधःस्फुरणे रणः स्यात्
प्रियस्तुतिः स्यात् स्फुरिते च कर्णे। योषित्समृद्धिः
स्फुरिते च गण्डे घ्राणे तु सौगन्ध्यमुदौ भवेताम्।
भोज्येष्टसङ्गावधरोर्द्धयोश्च स्कन्धे गले भोगविवृद्धिलाभौ।
स्पन्दो भुजस्येष्टसमागमाय स्पन्दः करस्य द्रविणाप्तिहेतुः।
स्पन्दश्च पृष्ठस्य पराजयाय स्पन्दो जयायोरसि मानवा-
नाम्। पार्श्वप्रकम्पे विषयस्य लाभः कटिप्रकम्पे तु
बलप्रमोदौ। नाभिप्रकम्पे निजदेशनाशः धनर्द्धि-
रन्त्रस्य भुवि प्रकम्पे। दुःखं धनान्तं हृदयस्य कम्पे
स्फिक्पायुकम्पेऽपि च वाहनाप्तिः। वराङ्गकम्पे
वरयोषिदाप्तिर्मुष्के सकम्पे तनयस्य जन्म। वस्तौ स
कम्पे युवतिप्रवृत्तिः दोषस्य कम्पे पुनरूरुपृष्ठे। ऊरः-
प्रकम्पे सुसहायलाभः स्याज्जानुकम्पे त्वचिरेण
सिद्धिः। जङ्घाप्रकम्पे निजदेशनाशः स्थानाप्तिरुच्चा चर-
णस्य कम्पे। यात्रा सलाभाऽङ्घ्रितलप्रकम्पे पुंसां सदा
दक्षिणदेहभागे। स्त्रीणाञ्च वामावयवे प्रजातः। स्पन्दः
फलानि प्रदिशत्यवश्यम्" वसन्तराजशाकुने ४र्थप्र०।

**स्फुर्च्छ** विस्मरणे भ्वा० प० सक० सेट्। स्फूर्च्छति अस्फू-
र्च्छीत् आदित् स्फूर्च्छितं स्फूर्च्छनम्।

**स्फुर्ज** वज्रशब्दे भ्वा० प० अक० सेट्। स्फूर्जति अस्फू-
र्जीत् द्वित्र स्फूर्जथुः। आदित् स्फूर्जितं स्फूर्जनम्।

**स्फुर्जथु** पु० स्फुर्ज अथु नि० न दीर्घः। वज्रनिर्घोषे अमरटीका।

**स्फुल** स्फूर्त्तौ चले च अक० सञ्चये सक० तुदा० कुटा० प०
सेट्। स्फुलति अस्फुलीत्। पुस्फोल। [युते त्रि०।

**स्फुल** न० स्फुल-क। १वस्त्रागारे (ताँवु) शब्दर०। २स्फूर्त्ति-

**स्फुलन** न० स्फुल-भावे ल्युट्। स्फुरणे नीलकण्ठः।

**स्फुलिङ्ग** पुंस्त्री० स्फुल-इङ्गच्, स्फुत् इतव्यक्तः शब्दो
लिङ्गति गच्छति यस्मात् लिगि-घञ् पृषो० वा। अग्नि-
कणे अमरः।

**स्फुलिङ्गिनी** स्त्री स्फुलिङ्ग-अस्त्यर्थे इनि। १अग्नि-
ज्वालायाम् जटा०। २स्फुलिङ्गयुक्ते त्रि०।

**स्फूर्जक** पु० स्फुर्ज-ण्वुल्। तिन्दुवृक्षे अमरः।

**स्फूर्जथु** पु० स्फुर्ज-अथु। वज्रपातशब्दे अमरः।

**स्फूर्त्ति** स्त्री स्फुर्च्छ-स्फुर-वा क्तिन्। १स्फुरणे २विका-
शने ३प्रतिभायाञ्च रमानाथः।

**स्फूर्त्तिमत्** पु० स्फूर्त्तिरस्त्यस्य मतुप्। १पाशुपताख्ये शैवभेदे
त्रिका०। २प्रतिभायुक्ते ३विकाशयुक्ते च त्रि० स्त्रियां ङीप्।

**स्फेयस्** त्रि० अतिशयेन स्फिरः, प्रचुरः इयसुन् स्फादेशः।
अतिप्रचुरे स्त्रियां ङीप्। इष्ठन्। स्फेष्ठोऽप्यत्र त्रि०।

**स्फोट** पु० स्फुटत्यर्थोऽनेन स्फुट-करणे घञ्। व्याकरणोक्ते
वर्णातिरिक्ते पूर्वपूर्ववर्णानुभवसहितचरमवर्णानुभवव्यङ्ग्ये
अर्थप्रत्यायके अखण्डे शब्दभेदे स्वार्थे क तत्रार्थे। व्याक-
रणमते वर्णसमुदयानां नार्थबोधकत्वं किन्तु स्फोट-
स्यैवेति प्रपञ्चितमस्माभिः शब्दार्थरत्ने यथा
"तत्र वर्णानां प्रत्युच्चारणमन्यथाप्रतीयमानतया अनित्य-
त्वेन आशुविनाशिनाश्च तेषां मेलनासम्भवेन तत्समुदा-
यस्यापि सम्बन्धित्वाभावेन प्रत्येकं वर्णेषु वृत्तौ व्यभि-
चारेण च पूर्वपूर्ववर्णानुभवाहितसंस्कारवीजवति अन्त्य-
वर्णजनितपरिपाकशालिनि हृदये झटिति समुदीयमानस्य
स्फोटरूपस्यैव शब्दस्य नित्यतया तत्रैव नित्यसम्बन्धस्य
योग्यतया वृत्तिमत्त्वमुचितमित्याकरे स्पष्टम्। तथाहि।
वर्णा यदि वाचकाः स्युः स्यादेव तेभ्यो व्यस्तेभ्योऽर्था-
वगतिः। न च तथा। प्रत्येकं वृत्तिमत्त्वाभावेन तत्-
समुदायस्य वृत्तिमत्त्वं सुदूरपराहतम्। आशुविना-
शिनां वर्णानां मेलनासम्भवेन तत्समुदायत्वासिद्धेः पूर्व-
पूर्ववर्णानुभवाहितसंस्कारसहितस्य चरमवर्णस्य वाच-
कत्वन्तु सम्भावितमपि दिनान्तरीयतादृशसंस्कारा-
नादाय वर्त्तमानचरमवर्णमात्रानुभवेन अर्थावगत्यापत्त्या
निरासितम्। अन्त्यवर्णपर्य्यन्तानामनुभवानन्तरं समुदा-
यानां संस्कारोदयकल्पनया पुनः समुदितवर्णानां स्मर-
णात्मकज्ञानतोऽर्थावगतिरित्यपि न सङ्गतं जारा राजे-
त्यादावविशेषेण तत्तद्वर्णसंस्कारसद्भावादुभयवैलक्षण्या-
नुपपत्तेः। अतोऽवश्यं वर्णातिरिक्तोऽन्त्यवर्णानुभवव्यङ्ग्यः
स्फोटनामा शब्दः स्वीकार्य्यः स्फुटति प्रकाशतेऽर्थोऽने-
नेति व्युत्पत्त्या च तस्य सार्थकनामता बोध्या समर्थित-
श्चैष एव पक्षः पातञ्जलभाष्ये व्यासचरणैः "तदेतेषा-
मर्थसङ्केतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणां य एको
बुद्धिनिर्भासस्तत्पदं वाचकं वाच्यस्य संकेत्यते तदेकं
पदमेकबुद्धिविषय एकप्रयत्नाक्षिप्तमभागमक्रममवर्णं बौद्ध-
मन्त्यवर्णप्रत्ययोपस्थापितं प्रतीयते" इत्यन्तेन। अत्र
चानेकवर्णानां शक्ततावच्छेदकतापेक्षयैकस्यैव जातिरूप-
स्फोटत्वस्य शक्ततावच्छेदकत्वकल्पने लाघवमपि द्रष्ट-
व्यम्। उक्तञ्च शब्दकौस्तुभे वोपदेवचरणैः "शक्यत्व
इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्। औपाधिको वा